त्रैमासिकी / जून २०२२

# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥

## ॥ गुरूपदेशः ॥



**दशमगुरु-परमपूज्य-**
**श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।**

स्वगुरुभिः दत्तं जपं कुर्यात् । केवलं गुरूणां विषये एव वक्तव्यं श्रोतव्यञ्च । एषापि तान् आसादयितुम् एका उपासना अस्ति ।



**एकादशगुरु-परमपूज्य-**
**श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।**

जपसाधनया यत् परिवर्तनम् आत्मनि प्रचलति तदेव प्रामाण्यं यत् भवतः अर्हताकारणेन भवता अनुग्रहः प्राप्तः , भगवत्प्रसादः च प्राप्तः ।

गुरूपदेशानुवादः – शीला कळावर , ठाणे

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः । ॐ श्रीभवानीशङ्कराय नमः । ॐ श्रीमात्रे नमः ।

गीर्वाणप्रतिष्ठायाः इयं पत्रिका इदानीं द्वितीयवर्षे पदार्पणं कुर्वती अस्ति। गतवर्षस्य जूनमासे अस्याः प्रवासः प्रारब्धः। अस्मिन् सायुज्यवर्षे गुरुवर्याणां चरणकमलयोः कृतम् एकं समर्पणम् आसीत् इयं पत्रिका। येषां कथाकवितालेखादीनां योगदानेन अस्याः पत्रिकायाः शोभा वृद्धिङ्गता, तेभ्यः सर्वेभ्यः धन्यवादाः।

इतः प्रभृति पत्रिकायां योगविषये तथा पाककलाविषये अपि लेखाः अन्तर्भूताः भविष्यन्ति। पत्रिकायां निरूपिताः सर्वे विषयाः भवतां मोदाय स्युः इति भावयामः।

इदं सायुज्यवर्षं परमपूज्य- गुरुवर्याणां पीठारोहण- रजतमहोत्सवेन तथा परमपूज्य-परमगुरुवर्याणां जन्मदिन-अमृतमहोत्सवेन भावनीयं संस्मरणीयं च। गुरुकृपया सोल्लासं सम्पन्नमहोत्सवद्वयं शोभनं हृदयङ्गमं च सञ्जातम्। गुरुशक्तेः काले काले दृश्यमान-अनुकम्पायाः असीमित-प्रवाहे निमज्जिताः वयं कृतार्थताम् अनुभूतवन्तः।

यस्मात्परतरं नास्ति, नेति नेतीति वै श्रुतिः।

मनसा वचसा चैव, नित्यमाराधयेद् गुरुम्॥

श्रीचरणयोः अस्माकं मनः संलग्नं भवेत् इति सम्प्रार्थ्य गीर्वाणपत्रिकायाः द्वितीयवर्षस्य प्रथमकुसुमं गुरुवर्याणां पादारविन्दे सानन्दं समर्पयामः।

– सम्पादिका

## चिन्तनम्

- **अनुराधा कर्पे , पालघर**

अधोनिर्दिष्टं सुभाषितम् अधिकृत्य गतमार्चमासे गीर्वाणप्रतिष्ठया आयोजिते चिन्तने बहवः सदस्याः सहभागं गृहीतवन्तः । सर्वैः प्रकटितानां स्वमतानां सारांशः अधः दीयते ।

**आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः ।**

**बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम् ॥**

मानवाः नैसर्गिकरूपेण शैशवावस्थातः सम्भाषितुम् आरम्भं कुर्वन्ति । किन्तु पक्षीगणेषु केचन एव तत् सामर्थ्यं प्राप्नुवन्ति । तेषाम् असामान्यत्वं परीक्ष्य मानवाः तान् मनोरञ्जनार्थं पञ्जरे निबध्नन्ति ।

**अस्माकं वाणी बन्धनं न भवेत् इत्यर्थं किं करणीयम् ?**

मितं च सारं च वचो हि वाग्मिता ।

कियत् सत्यम् एतत् वचनम् ! यद्यपि "हितं मनोहारि च दुर्लभं वचः" तथापि "मुण्डे मुण्डे मतिर्भिन्ना , तुण्डे तुण्डे सरस्वती" इति वचनानुसारेण जनानां भाषणं , वाक्प्रयोगाः वा विविधप्रकारैः भवितुमर्हन्ति । सुहृदसम्पन्नं वातावरणं भवेत् चेत् वक्तव्ये केषाञ्चन नियमानाम् , अनुशासनस्य च पालनं भवेत् । अतः तावदेव वक्तव्यं हितकरं वर्तते यावत् सर्वे सम्बन्धाः सुरक्षिताः भवन्ति । तेन सुखं शान्तिं च प्राप्येते ।

किन्तु सदैव मौनाचरणं मानवानां कृते अशक्यमेव । तथैव अनर्गलवाचालतया तु अपरिमिता हानिः भवति । अतः उभयोर्मध्ये समतुल्यत्वं परिशीलनं च आवश्यकम् ।

**मौनं कदा आवश्यकम् ?**

यदि वयं कस्यापि गुह्यं वा गोपनीयवार्तां जानीमः तर्हि अस्माभिः आदरपूर्वकं मौनं धारणीयम् । तथैव मर्मवाक्यमपि नोच्चरणीयम् ।

क्वचित् किमपि शुद्धं सत्यं सति अपि यदि लोकविरुद्धं नाचरणीयम् अस्ति तर्हि तत् न वक्तव्यम् ।

गुरोः उपस्थित्यां तेषाम् उपदेशस्य समये , पण्डितानां प्रवचनसमये , यदा जनाः स्वकार्ये व्यग्राः सन्ति , एकाग्रतायाः नितराम् आवश्यकता अस्ति तदा मौनं धार्यम् ।

यदा कापि चर्चा प्रचलन्ती अस्ति तदा यदि विषयस्य सम्यक् पर्याप्तं ज्ञानं नास्ति तदा जल्पनं व्यर्थमेव ।

“अर्धघटो घोषमुपैति नूनम् ।”

क्रोधावसरे मौनता अवलम्बनीया । तदा "अहं क्रोधात् परः अस्मि , अहं क्षमया पूर्णोऽस्मि, अतः क्रोधस्य वशीभूतो भवितुमपि अनर्हः एव" इत्येव चिन्तनीयम् ।

**भाषणं कथं करणीयम् ?**

ईदृशं भाषस्व येन अन्ये त्वां श्रोतुमुत्सुकाः भवेयुः । ईदृशं शृणु येन अन्ये त्वया सह भाषितुमुत्सुकाः भवेयुः ।

सुचिन्त्य चोक्तं , सुविचार्य यत्कृतं , सुदीर्घ कालेऽपि न याति विक्रियाम् । ये जनाः अविचार्य कर्मणि प्रवर्तन्ते, तेषां प्रवृत्तिः भाषणमपि अज्ञानमूले । हंसक्षीरन्यायमवलम्ब्य भाषताम् । अस्माकं वाणी अस्माकं संस्कारान् दर्शयति । यदा गुरुद्रोहं , राष्ट्रद्रोहं वा ज्येष्ठान् प्रति अनादरयुक्तं वर्तनं दृश्यते श्रूयते वा तदा मौनं शक्तिहीनतां प्रदर्शयति । तदा वज्रादपि कठोरा वाणी अपेक्षिता । यतः मौनं स्वीकृतिलक्षणम् ।

क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।

अल्पाक्षररमणीयं यः कथयति निश्चितं सः खलु वाग्मी ।

यादृशं बीजवपनं तादृशं वृक्षस्य स्वरूपम् । मानवैः परदोषदर्शनाभ्यासं परित्यज्य स्वदोषः एव अवलोकनीयः। विवेकयुक्तभाषणेन प्रतिकूलपरिस्थितिरपि अनुकूलतायां परिवर्तयितुं शक्यमस्ति।

यदि कण्ठे सुधा , जिह्वायां मौनं , स्मयमानं वदनम् इति गुणत्रयमस्ति तर्हि सर्वार्थाः साध्यन्ते ।

## सुभाषितम्

**- विद्या सन्दीप कुमटा , मुम्बई**

**नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः ।**

**विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता ॥**

**भावार्थः -**

मृगाः कदापि अभिषेकम् अथवा संस्कारान् कृत्वा सिंहस्य पट्टाभिषेकं न कुर्वन्ति । सिंहः स्वयमेव स्वपराक्रमस्य प्रभावेण वनस्य आधिपत्यं प्राप्नोति ।

नीतिः - यः स्वस्य गुणैः सामर्थ्येन च मान्यतां प्राप्नोति , तस्य कृते वैभवसमारम्भस्य आवश्यकता नास्ति ।



# कार्लामहिमा

**- वृन्दा चन्दावर , मुम्बई**

गच्छाम सर्वे कार्लाक्षेत्रं
वन्दामहै श्रीपरिज्ञानाश्रमगुरुम् ॥ धृ ॥

नमाम दुर्गां शक्तिस्वरूपिणीं
गणेशं तथा नागदेवताम् ।
गच्छाम सर्वे कार्लाक्षेत्रं
वन्दामहै श्रीपरिज्ञानाश्रमगुरुम् ॥ १ ॥

अत्रस्थित-सञ्जीवनी-समाधिः
मनोरथान् पूरयति सर्वेषाम् ।
गच्छाम सर्वे कार्लाक्षेत्रं
वन्दामहै श्रीपरिज्ञानाश्रमगुरुम् ॥ २ ॥

अत्र प्रतिष्ठितश्रीभवानीशङ्करः
शीघ्रं हरति दारिद्र्यदुःखचिन्ताम् ।
गच्छाम सर्वे कार्लाक्षेत्रं
वन्दामहै श्रीपरिज्ञानाश्रमगुरुम् ॥ ३ ॥

सदा कृतार्थ-प्रमुदिताः वयं
करवाम जीवनं सुसमृद्धम् ।
गच्छाम सर्वे कार्लाक्षेत्रं
वन्दामहै श्रीपरिज्ञानाश्रमगुरुम् ॥ ४ ॥



# पुण्यभूमिः

**-कृष्ण शर्मा , होन्नावर**

इयं भूमिः अयं देशः
पुण्यभूमिः भारतः ।
शौर्य-धैर्य-अहिंसा-शान्तिः
संस्कृत्याः सङ्केतः ॥

देव-ऋषीणां यति-तपस्विनाम्
आशिषः कुर्वन्ति संरक्षणम् ।
सत्य-अहिंसा-धर्म-पूरितः
भारतदेशो महान् अयम् ॥

इतिहासस्य पृष्ठं पृष्ठं
दर्शयति त्यागं बलिदानम् ।
जागरयति देशाभिमानं
भारतदेशो महान् अयम् ॥

# अद्भुतागमनं गुरूणाम्

**-उदया माविनकुर्वे , बेङ्गलूरु**



दया बाळे कोप्पीकर, न्यू जर्सी

भटकळ-नगरात् अनतिदूरं हडीन्-नामकः ग्रामः वर्तते। तत्र अस्ति मम पितुः परिजनानां पुरातनं गृहम्।

मम पितुः उपनामासीत् "हेब्ळे"। एषः हेब्ळे - कुटुम्बः श्रीमत् - पाण्डुरङ्गाश्रम - गुरुवर्याणां कालावधेः बहु पूर्वमेव हडीन् मध्ये वासं करोति स्म । गृहात् किञ्चित् दूरमस्ति प्राचीनं श्रीदुर्गापरमेश्वरी देवस्थानम्। एतत् मन्दिरं प्रायः ६०० वर्षेभ्यः पूर्वं, हेब्ळे - कुटुम्बस्य आगमनात् प्रागेव प्रतिष्ठितं स्यात् इति केनापि प्रौढशास्त्रिणा उक्तम्।

हेब्ळे - कुटुम्बे क्षेत्रे स्थिते सति, देवस्थानस्य नित्य-नैमित्तिक-विनियोगानाम् उत्तरदायित्वं श्रद्धया ऊढं मम पूर्वजैः। किन्तु गतेन कालेन दारिद्र्यपीडिताः स्युः मे प्रपितामहः इत्यादयः । अतः मन्दिरस्य सम्यक् पालनं कर्तुम् अशक्ताः जाताः स्युः । क्रमेण मन्दिरमपि जीर्णं जातम्। तथापि देवस्थानस्य अधिष्ठात्रीदेवतायाः महिमा वर्धमाना आसीत्।

१९७४ मध्ये रथोत्सवार्थं श्रीवल्लीं गतवन्तः मम पितरौ अहं च, प्रथमवारं श्रीपरिज्ञानाश्रमगुरुवर्यान् मिलितवन्तः। मम पिता, "अहं हेब्ळे रमानन्दः। हडीन्-ग्रामे अस्माकं गृहं, श्रीदुर्गापरमेश्वरी-मन्दिरञ्च स्तः" इति स्वपरिचयं दत्तवान् । " ओ ! एवं किम् ? भवतां मन्दिरस्य विषये बहु श्रुतं मया । श्रीदुर्गापरमेश्वरी मम इष्टदेवता । अहं तत्र दर्शनार्थं गन्तुम् इच्छामि !" इति गुरुवर्याः कुतूहलेन उक्तवन्तः । "किन्तु अधुना न शक्यम्। रथोत्सवस्य कार्याणि सन्ति किल। अनन्तरं पश्याम।"

रथोत्सवस्य अनन्तरं वयं हडीन्-ग्रामं गतवन्तः । गुरुवर्यान् प्रतीक्षमाणाः सन्तः वयं दिनानि यापितवन्तः । "अद्य आगच्छेयुः!" इति सूर्योदये उत्थाय, प्राङ्गणं शुद्धीकृत्य, रङ्गावलिं विरचय्य, पादप्रक्षालनार्थम् उदकमित्यादिकं सिद्धीकृत्य, गुरुवर्याणां प्रतीक्षणम् अस्माकं नित्यकार्यम्!!!

किन्तु, सप्ताहे गतेऽपि गुरुवर्याणाम् आगमनं नैव अभवत्। गुरुवर्याः अन्यत्र कुत्रापि कार्यार्थं गतवन्तः इत्यपि श्रुतम्। ततः हताशाः वयं सामान्यजीवने मग्नाः अभवाम।

किन्तु मम अन्तःकरणे "गुरुः आयाति एव!" इति मन्त्रः अहोरात्रं प्रचलन्नासीत् । कस्मिंश्चित् मध्याह्ने भोजनानन्तरं वयं सर्वे प्राङ्गणे आम्रवृक्षच्छायायां विश्रामं कुर्वन्तः आस्म । ग्रीष्मर्तुः, सूर्यदेवस्य प्रकृष्टेभ्यः किरणेभ्यः रक्षितुम् आकाशे मेघानां लवलेशोऽपि नासीत् ! भोजनमपि अतिभुक्तं स्यात् । वयं क्रमेण जाग्रदवस्थातः स्वप्नावस्थायां संसरन्तः आस्म। मम पितुः महती घोरिका श्रुता च!!

तदैव, दूरात् केचन ग्रामिणः धावन्तः उच्चैः "मठस्य जीपवाहनम् आगतम्! मठस्य जीपवाहनम् आगतम्!"

इति आक्रोशन्तः आगच्छन् । वयं सर्वे शीघ्रातिशीघ्रम् उत्थाय इतस्ततः अधावाम !! अस्माकं सम्भ्रमः दर्शनीयः आसीत् ! कथञ्चिदपि कुतश्चिदपि पादप्रक्षालनार्थं जलम् इत्यादिकं , फलसमर्पणार्थं, पादपूजनार्थं च सामग्रीः सिद्धाः कृताः, गुरुवर्याणां कृते वृक्षच्छायायाम् आसन्दः अलङ्कृतः ! तावता श्रीमत् परिज्ञानाश्रमगुरुवर्याः प्राङ्गणे आस्थिताः, तेषां चारुहासिमुखकमलेन सूर्यदेवोऽपि हतच्छायोऽभूत् !!

साक्षात् भवानीशङ्करः एव आगतः !!

मम पिता, पितृव्यः परिसरवासिनः च तत्रैव धूल्यां साष्टाङ्गं प्रणतवन्तः । वयमपि महिलाः बद्धाञ्जलयः प्रणिपतितवत्यः । अस्मान् सर्वान् वात्सल्यदृष्ट्या अनुगृह्य गुरुवर्यैः आम्रवृक्षच्छायायां स्थापितः आसन्दः अलङ्कृतः। मम पितरि पादपूजायै सिद्धीकृतां स्थालिकां गृहीत्वा अग्रे गते सति, "मास्तु" इति इङ्गित्वा, श्रीचरणाः उक्तवन्तः, "अग्रिमे अवसरे यदा भवतां श्रीदुर्गापरमेश्वरीदेव्याः दर्शनार्थम् आगमिष्यामि तदा करोतु। अद्य मास्तु पादपूजा..." मम जनकं विस्मयोत्फुल्लनयनं निरीक्ष्य हसन्तः "... तदपि अस्मिन् वेषे !! भो रमानन्द, को वेषोऽयम् ? कुत्रापि उक्कळिं ( रङ्गक्रीडां ) क्रीडित्वा आगतवान् किम् ?" मम पिता स्ववस्त्राणि समालोक्य लज्जया नीचैः उत्तरं दत्तवान् , "क्षम्यतां गुरुवर्य, चित्रापुरमठे उक्कळिसमये रञ्जितानि एतानि, गृहे धारयामि । अद्य आवेगात् तानि परिवर्तयितुं विस्मृतम् ।" एवम् उक्त्वा सः गुरुवर्यान् नतवान् ।

गुरुवर्याः तस्य शिरसि हस्तं संस्थाप्य प्रेम्णा केशान् कर्षन्तः उक्तवन्तः "अस्तु भो, किञ्चित् विनोदं कृतवान् । चिन्ता मास्तु । अद्य मम आगमनस्य विशेषहेतुः वर्तते । त्वं कदाचित् उक्तवान् आसीत् यत् तव माता पुरातनानि कोङ्कणी- गीतानि जानाति इति । तानि श्रोतुकामोऽस्मि । कृपया ताम् आह्वय, गीतानि गापय च ।”

मम पितामही गुरुसन्निधौ आगन्तुमेव नैच्छत् । वातायनादेव तेषां मुखकमलं निर्निमेषदृष्ट्या अवेक्षमाणा आसीत् । मम पितृव्यः कथञ्चिदपि तां सम्प्रबोध्य श्रीचरणानां पुरतः संस्थाप्य उक्तवान् , "अम्ब, गुरुवर्याः तव कोङ्कणी-गीतानि श्रोतुम् उत्सुकाः सन्ति। कृपया गायतु " इति । सा च गुरूणां प्रति पृष्ठं कृत्वा लघुबालिका इव उच्चैः गानं प्रारब्धवती ! गुरुवर्याः सविस्मयम् अपृच्छन्, "किमेवं तिष्ठसि अम्बक्का?" इति । "गुरुवर्य, विधवाभिः गुरुम् अभिमुखीभूय न स्थातव्यं इति मम श्वश्रूः अवदत् " इति सविनयं प्रत्युक्तवती मे पितामही ।

करुणामूर्तिगुरुवर्याः प्रेम्णा अवदन् , "ते सर्वे पुरातनविचाराः अम्बक्का। अधुना तथा किमपि नास्ति । कृपया मां सम्मुखीभूय गायतु । अहं तव गानं श्रोतुम् अतीव कौतुकितोऽस्मि ।" गुरुवचनैः आश्वासिता अम्बक्का गुरून् प्रणम्य , निर्भीकतया सुमधुरस्वरेण स्फुटं गीतवती। सद्गुरुवर्याः तालं ददतः शृण्वन्तः आसन् ।

तस्याः गायने समाप्ते, "अतिमधुरम् अतिमधुरम् ! अम्बक्का, तव स्वरः बहुसुश्राव्यः अस्ति । अद्यत्वे इमानि पुरातनानि गीतानि विस्मृतानि प्रायः । तानि रक्षणीयानि । रमानन्द , अग्रिमे सप्ताहे अम्बक्कां मठम् आनय । तत्र तस्याः गीतानां ध्वनिमुद्रणं कारयामः । अधुना अम्बक्कायाः चायं तस्याः गानमिव रुचिकरमस्ति वा इति पश्याम !" गुरूक्तिभिः उत्तेजिताः वयं शीघ्रं शीघ्रम् अल्पोपहारस्य सज्जताम् अकुर्वन् । ततः किञ्चित् समयं यावत् विश्रामं कृत्वा, श्रीचरणाः प्रस्थितवन्तः ।

एषा घटना मम स्मरणपथे पौनःपुन्येन आगच्छति । कियन्तः पुण्यवन्तः वयम् ! गुरुवर्यैः सह अमूल्यसमयं यापयितुम् अवसरः प्राप्तः ! अहो सौभाग्यम् , अहो सौभाग्यम् अस्माकम् !!! एतादृशाः अवसराः अनेकजन्मनां पुण्यार्जनेनैव प्राप्यन्ते किल ?

बालरञ्जनी

# अमेयस्य परिपृच्छा

**- शिल्पा मुद्गुर , मुम्बई**




अमेयः गृहपाठे मग्नः आसीत् । सहसा सः अग्रजम् अमोघम् अपृच्छत् -

अमेयः – कारयानं किमर्थं निर्जीवम् इति गण्यते । अहं मन्ये मानवः इव कारयानं सजीवम् एव ।

अमोघः – ( अपहस्य ) एतत् कथं सिद्धं करोषि ?

अमेयः – मानवः चलति । कारयानमपि चलति । चलितुम् ऊर्जा आवश्यकी । मानवः अन्नात् ऊर्जां प्राप्नोति । कारयानम् इन्धनतैलात् ऊर्जां प्राप्नोति । यथा मानवः अन्नं खादति , मार्जारः दुग्धं पिबति तथा कारयानम् इन्धनतैलं पिबति । इत्थम् इन्धनतैलं कारयानस्य अन्नं भवति खलु ।

सद्यः एव शालायां 'सजीव-निर्जीवयोः भेदः कः ?' इति विषये चर्चा अभवत् । सीमामहोदया विज्ञान-विषयस्य अध्यापिका । सा प्रश्नान् पृष्ट्वा छात्रेषु कुतूहलं जनयति तान् चिन्तयितुं प्रेरयति च । तस्याः पाठनम् अतीव रोचकम् । अतः अमेयाय विज्ञान-विषयः अतीव रोचते । गृहपाठं कुर्वतः तस्य मनसि एषः प्रश्नः आगतः । अतः सः अग्रजेन सह चर्चाम् आरब्धवान् ।

अमोघः – कारयानं श्वसनं करोति किम् ?


कारयानम्

अमेयः – ( चिन्तयित्वा ) मानवः श्वासोच्छ्वासं करोति इत्युक्ते सः ओक्सिजन-वायुं स्वीकरोति, कार्बन-डायोक्साइड-वायुं च निक्षिपति । कारयानस्य कृते अपि इन्धन-ज्वलनार्थम् ओक्सिजन-वायुः आवश्यकः । तथैव यानात् धूमः निर्गच्छति । तस्मिन् प्रामुख्येन कार्बन-डायोक्साइड-वायुः एव भवति किल ? यदा कारयानं तपति तदा चालकः जलं पाययति । कारयानं सजीवमेव इति मम मतिः यतः वाहनं श्वसनं करोति , अन्नं खादति , जलं पिबति च ।

अमोघः – (अञ्जलिं कृत्वा ) अलं तव तर्केण । मम समयं व्यर्थं मा कुरु | अहं विना उपरोधम् अभ्यासं कर्तुम् इच्छामि ।


मार्जारः

अमेयः – (असन्तोषेण ) अहं गृहपाठे 'कारयानं सजीवं वा निर्जीवं वा ?' एतस्य उचितम् उत्तरं लेखितुम् इच्छामि ।

अमेयः पितामहस्य समीपं गतवान् । पितामहः क्षान्त्या तस्य तर्कं श्रुतवान् ।

पितामहः – ( मस्तकं चालयित्वा ) हम् .... । त्वं गभीर-विचारं कृतवान् इति दृश्यते । चतुरः खलु मम बालः । अधुना एवं चिन्तय - इन्धनं वाहनस्य अन्नम् इति यदि स्वीकुर्मः तर्हि अन्नं खादित्वा वाहनम् आकार-परिमाणेन वर्धते वा ? सजीवस्य मुख्यं लक्षणं तस्य वृद्धिः , न केवलं चलनं वा श्वसनं वा ।


वायुगोलकः

अमेयः – ( विचार्य ) वायुगोलकः फुल्लति , रोटिका फुल्लति । सा अपि वृद्धिः किल ?

पितामहः – वायुगोलकस्य रोटिकायाः च परिमाणं वायुना वर्धते । किन्तु यदा वायुः निर्गच्छति तदा पुनः लघूभवति । मानवानां परिमाणं , भारम् औन्नत्यं च वर्धन्ते । स्थूलः पुरुषः कृशः भवति, परन्तु उन्नतः पुरुषः वामनः न भवति ।

अमेयः – आम् । तत् सत्यम् ।

पितामहः – यथा मार्जारस्य शुनकस्य शावकाः भवन्ति तथा वाहनस्य शावकाः भवन्ति वा ?

चित्राणि – दया बाळे कोप्पीकर, न्यू जर्सी




अमेयः – न , कारयानस्य शावकाः तु न भवन्ति । ( सम्यक् विचिन्त्य ) तस्मात् कारयानं निर्जीवम् इति मन्तव्यम् ।

( पुस्तके उत्तरं लिखन् , सहसा ) चिन्तयतु पितामह, यदि तत् शक्यं तर्हि एकस्मात् क्रीडनकात् बहूनि क्रीडनकानि प्राप्नुयाम । मम क्रीडनकाय अन्नं दत्त्वा तातस्य कृते बृहत् कारयानं प्राप्नुयाम ।

एतेन विचारेण उभौ उच्चैः हसितवन्तौ । परम् अग्रिमे क्षणे अमेयः खेदेन अवदत् ।

अमेयः – पितामह , मम तर्कः अनुचितः आसीत् । क्षम्यताम् । अहम् एतादृशान् प्रश्नान् पृष्ट्वा भवन्तं पीडितवान् ।

पितामहः – तथा मा चिन्तय वत्स । परिपृच्छा आवश्यकी । कुतूहलं सर्वदा रक्षितव्यम् । तेनैव अस्माकं ज्ञानं वर्धते ।

**यः पठति लिखति पश्यति परिपृच्छति पण्डितान् उपाश्रयति ।**

**तस्य दिवाकरकिरणैः नलिनीदलमिव विकास्यते बुद्धिः ॥**

न केवलं छात्रजीवने , अग्रे अपि तथैव भवितव्यम् । विविधविषयान् ज्ञातुम् उत्सुकता सर्वथा आवश्यकी ।

अमेयः – पितामह, मह्यं विज्ञानम् अतीव रोचते । एतादृशं विचारणम् अपि रोचते । वस्तुतः नैकेषु विषयेषु मम रुचिः ।

पितामहः – ( सस्मितम् ) उत्तमम् । वत्स, अस्माकं दशम-गुरुवर्याणां श्रीमत्-परिज्ञानाश्रम-स्वामिनाम् अपि कतिपयेषु विषयेषु अभिरुचिः आसीत् – अभियन्त्रणशास्त्रे, खगोलशास्त्रे , मुद्राशास्त्रे, मूल्याङ्क-सङ्ग्रहणे । यन्त्राणां विषये तेषां गभीरज्ञानं सर्वान् विस्माययति स्म । तैः स्वयं ट्रान्सिस्टर-रेडियो-यन्त्रं रचितम् । रेखाचित्राणि आलिख्य त्वया सदृशान् बालकान् ते लघु-रेडियो-यन्त्रस्य रचनां पाठयन्ति स्म ।

तैः HAM-रेडियो-सञ्चार-विषये पठित्वा, परीक्षां लिखित्वा अनुमति-पत्रं प्राप्तम् । शिराली-ग्रामे दूर-सञ्चार-व्यवस्था न आसीत् । गुरुवर्यैः पञ्चवटी-पर्वते HAM-रेडियो-केन्द्रं स्थापितम् । अन्तरिक्ष-अवलोकन-स्थानं वर्षा-मापन-यन्त्रं च स्थापिते । आपत्कालीन-सङ्केतं दत्त्वा ते कृषकाणां साहाय्यं कुर्वन्ति स्म ।

अमेयः – (सविस्मयम्) एतत् न ज्ञातवान् अहम् ! केवलं पञ्चवटी-पर्वते हरिणानाम् उद्यानवनम् आसीत् इति ज्ञातम् ।

पितामहः – आम् । तैः अस्माकं पुरतः आदर्शः स्थापितः ।

वत्स , यस्मिन् विषये तव रुचिः अस्ति , तद्विषये पठ , चिन्तनं कुरु , प्रश्नान् पृच्छ , विमर्शं कुरु , सम्यक् ज्ञानं च प्राप्नुहि । तत् ज्ञानं च अन्येषां साहाय्यार्थं भवतु ।

अमेयः – तथैव करिष्यामि पितामह ।

पितामहः – (सानन्दम्) गुरुवर्याणाम् अनुग्रहं प्राप्य समर्थो भव ।

विद्वान् भव । आयुष्मान् भव ।



**पूज्याः श्रीमत्-परिज्ञानाश्रम-स्वामिनः HAM-रेडियो-यन्त्रं चालयन्तः**

## पदबन्धः

**अधोदत्तपदबन्धतः 'सूर्यः' इति शब्दस्य १६ समानार्थक-शब्दान् अन्विष्यन्तु ।**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| स | वि | ता | प | ची | र | मि | पू |
| ह | अ | थः | ग | री | स | त्रः | षा |
| स्रां | र्कः | ना | त | म | प्ता | प | णा |
| शुः | क्र | या | प | ति | श्वः | थ | जा |
| भ | ग | छा | नः | सा | आ | दि | त्यः |
| हि | र | ण्य | ग | र्भः | ला | वा | म |
| म | विः | र | म | नुः | जा | क | वि |
| गः | ख | गा | न | भा | स्क | रः | च |

(उत्तराणि अन्तिमपृष्ठे दत्तानि)

## हास्यकणिका

एकदा नेपोलियनः कञ्चन वणिजम् अवदत्।

नेपोलियनः - मम शब्दकोशे अशक्यमिति शब्दः एव नास्ति ।

वणिक् - इदानीम् अस्य कथनेन किं प्रयोजनम् ??
तत्समये एव सम्यक् परीक्षणं कृत्वा शब्दकोशः क्रेतव्यः आसीत् ।

## रुचिरा

# कदलीफल-पूरिकाः

**-चन्द्रमा बिजूर, मुम्बई**



साहित्यम् – १ मध्यम-कदलीफलम्
२ चमसपरिमितं (स्वादानुसारं वा) गुडम्
किञ्चित् लवणम्
गोधूम-पिष्टकम्
भर्जनार्थं तैलम्

कृतिः – कदलीफलं मृद्नातु । तस्मिन् गुडं लवणं च संयोजयतु । मिश्रणं करोतु । मिश्रणे गोधूम-पिष्टकं संयुज्य पूरिकाणां कृते पिष्टं सिद्धं करोतु । वेल्लन्या आवर्तयतु । तैले निम्मज्य सम्यक् भर्जयतु ।

एताः पूरिकाः दिनत्रयं यावत् खादितुं शक्यते । परन्तु ताः अतीव स्वादिष्ठाः भवन्ति । अतः यदा पूरिकाः सिद्धाः भवन्ति तदा परिवारसदस्याः त्वरितं खादन्ति एव ।

# योगविषये किञ्चित् ...

## सूर्यनमस्कारः

**लेखः – मीनाक्षी बलजेकर , ठाणे**
**अनुवादः – वैशाली कोप्पीकर , मुम्बई**

**योगेन चित्तस्य पदेन वाचा मलं शरीरस्य च वैद्यकेन ।**
**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥**

वर्तमाने काले मानवाः कार्यभारेण वा प्रदूषणेन वा उद्विग्नमनसः सन्ति त्रस्ताः अपि सन्ति । अस्माकं प्रियाः परमपूज्याः स्वामिनः कथयन्ति यत् अस्माकं सुदृढ-शरीरं तथा सुदृढं मनः च अद्यतनीये आवश्यकते वर्तेते । मनः प्रसन्नं भवति चेत् प्रपञ्चः परमार्थः च सुसम्बध्दौ भवतः ।

योगासनेन को वा लाभं प्राप्नोति ?

**युवा वृद्धोऽतिवृद्धो वा व्याधितो दुर्बलोऽपि वा ।**
**अभ्यासात् सिद्धिमाप्नोति सर्वयोगेष्वतन्द्रितः ॥**

योगसाधनाविषये नैके ग्रन्थाः लिखिताः सन्ति । तेषु आसनानां महत्त्वं वर्णितम् अस्ति । पातञ्जलयोगसूत्रे अष्टाङ्गयोगे आसनं तृतीयसोपानमिति कथितमस्ति । गुरुवर्याः अपि वदन्ति एव स्थिरं सुखम् आसनम् इति । अस्माकं साधनायां योगासनानां महत्त्वं वर्तत एव इति तु सुस्पष्टम् ।

अद्य वयं सूर्यनमस्कारविषये जानीमः । १९२०(संवत्) वर्षे औन्धनगरस्य नृपः भवनराव-श्रीनिवासराव-पन्तः आसीत् । सः सूर्यनमस्कारस्य प्रचारम् अकरोत् । इदानीं सूर्यनमस्कारः सर्वत्र प्रसिद्धः वर्तते ।

सूर्यनमस्कारे दश-आसनानां समन्वयः अस्ति । योगवार्षिकोत्सवदिने सूर्यनमस्काराः अपि कार्यक्रमान्तर्गताः भवन्ति ।

को वा एतस्य लाभः ? अस्तु शृणुमः एतस्य काञ्चन महत्त्वपूर्णान् लाभान् ।

यथाशक्ति सूर्यनमस्कारेण शरीरलाघवं वर्धते । रुधिराभिसरणं वर्धते । अवयवानां स्नायवः स्थिरीभवन्ति ।

श्वासोच्छ्वासः तथा पचन-प्रक्रिया भद्रतरे भवतः ।

## सूर्यनमस्कारस्य क्रमशः विधिः -

| | |
|---|---|
| **१) प्रथमं सोपानम्** – नमस्कारमुद्रां कृत्वा पद्भ्यां सरलं स्थातव्यम् । उच्छ्वासः करणीयः ।  | **७) सप्तमं सोपानम्** – श्वसन् कूर्परौ सरलं संस्थाप्य पूर्वकायं भुजङ्गासनवत् उन्नेतव्यम् ।  |
| **२) द्वितीयं सोपानम्** – श्वसन् हस्तौ उन्नीय शरीरं प्रलम्बनीयम् ।  | **८) अष्टमं सोपानम्** – प्रश्वसन् अधोमुख श्वानासने भवितव्यम् ।  |
| **३) तृतीयं सोपानम्** – प्रश्वसन् पुरतः अवनम्य पादाङ्गुलीस्पर्शप्रयत्नः करणीयः। एतस्मिन् समये स्कन्धौ उत्तानावस्थायामेव स्थापनीयौ ।  | **९) नवमं सोपानम्** – श्वसन् दक्षिणपादं पुरतः दक्षिणहस्तः समीपे आनेतव्यम् ।  |
| **४) चतुर्थं सोपानम्** – श्वासं पूरयन् एव करतलौ पादयोः पार्श्वे भूमौ स्थापयित्वा दक्षिणपादः साक्षात् पृष्ठतः प्रसारणीयः ।  | **१०) दशमं सोपानम्** – प्रश्वस्य पादद्वयम् उभयतः हस्तपादासनवत् स्थापनीयम् ।  |
| **५) पञ्चमं सोपानम्** – श्वसनं कुर्वन् वामपादः दक्षिणपादं यावत् प्रसार्य नितम्बौ ऊर्ध्वमुत्थाप्य अधोमुखश्वानासने भवितव्यम् ।  | **११) एकादशं सोपानम्** – श्वसन् शरीरं प्रसार्य उत्तानेन स्थातव्यम् ।  |
| **६) षष्ठं सोपानम्** – बाह्य-कुम्भकं कृत्वा (प्रश्वस्य कुम्भकं कृत्वा) जानुभ्यां कपालेन च भूमिः स्प्रष्टव्या ।  | **१२) द्वादशं सोपानम्** – प्रश्वसन् पूर्वस्मिन्नेव स्थित्यां (नमस्कार-मुद्रया) भवितव्यम् ।  |

चित्राणि – वन्दना शिरुर, दादर

एतानि सूर्यनमस्कारस्य द्वादश सोपानानि पुनः वामपादेन आरभ्य सूर्यनमस्कारस्य एकमावर्तनं पूर्णं करणीयम् । अग्रिमे वार्तापत्रे वयम् अन्येषाम् आसनानां विषये ज्ञास्यामः ।

# सुभाषितानि

**– कृष्णानन्द मङ्कीकर , मुम्बई**

गीर्वाणपत्रिकायाः मार्चमासस्य संस्करणे अस्माभिः सानिका बळवळ्ळी महोदयया प्रस्तुतानि रोचकानि सुभाषितानि दृष्टानि । 'मृगात् सिंहः पलायते' इति विचित्रा उक्तिः दृष्ट्वा परस्परं भावयन्तः उष्ट्राः गर्दभाश्च दृष्टाः अस्माभिः ।

सुभाषितेषु प्रहेलिकाः, कूटप्रश्नाः, समस्यापूर्तयश्च वर्तन्ते । कानिचित् पश्यामः ।

**वृक्षाग्रवासी न च पक्षिराजः**
**त्रिनेत्रधारी न च शूलपाणिः ।**
**त्वग्वस्त्रधारी न च सिद्धयोगी**
**जलं च बिभ्रन्न घटो न मेघः ॥**

इत्यस्मिन् कूटप्रश्ने, नारिकेलफलम् इत्युत्तरम् अपेक्षितम् तत्सुज्ञैः ज्ञातमेव इति मन्ये।

एकां समस्यापूर्तिं पश्यन्तु । एकदा राज्ञा चतुर्थः चरणः दत्तः - ठंठंठठंठंठठठंठठंठः ।
शीघ्रकविना एवं समस्यापूर्तिः कृता -

**रामाभिषेके जलमाहरन्त्या हस्ताच्च्युतो हेमघटो युवत्याः ।**
**सोपानमार्गेण करोति शब्दं ठंठंठठंठंठठठंठठंठः ॥**

एकमन्यं श्लोकं पश्यन्तु यस्य चतुर्थः चरणः आसीत् - गुलुगुग्गुलुगुग्गुलु
श्लोकः अभवत्,

**जम्बूफलानि पक्वानि पतन्ति विमले जले ।**
**कपिकम्पितशाखाभ्यो गुलुगुग्गुलुगुग्गुलु ॥**

अन्यमेकं श्लोकं पश्यन्तु, यस्मिन् श्लोके एव उत्तराणि गर्भितानि सन्ति ।

**सीमन्तिनीषु का शान्ता**
**राजा कोऽभूत् गुणोत्तमः ।**
**विद्वद्भिः का सदा वन्द्या**
**अत्रैवोक्तं न बुध्यते ॥**

कविः कथयति उत्तरमत्रैव उक्तं परन्तु न बुध्यते । अत्र प्रतिचरणस्य प्रथमम् अक्षरं तथा अन्तिमम् अक्षरम् युक्तं कुर्वन्तु तदेव उत्तरम् । एवंविधानि अनेकानि सुभाषितानि श्लोकाः च "काव्यशास्त्रविनोदार्थम्" अनेकैः ज्ञाताज्ञातकविभिः कृताः अस्माकं मनोविनोदार्थं ज्ञानार्थं च । यथोक्तं पूर्वम्, एतावताः अनेकाः सूक्तयः सुभाषितानि श्लोकाश्च संस्कृत-वाङ्मये प्रचुरतया सन्ति । तासामभ्यासेन न केवलं मनोविनोदः भवेत् किन्तु भवतां भाषासौष्ठवमपि वर्धेत इति मन्ये ।

आगामिनि संस्करणे मानवस्वभावाधारितानि कानिचित् सुभाषितानि सूक्तयः वा पश्यामः ।

इत्यलम् । शुभं भवतु ।

# युक्तिः

**- पूर्णिमा कार्नाड , बेङ्गलूरु**

देवशर्मा नाम्ना एकः पण्डितः आसीत्। सः प्रतिदिनं सायङ्काले महाराज्ञ्यै पौराणिककथां श्रावयितुं राजप्रासादं गच्छति स्म। कथायाः अन्ते पण्डितः वदति स्म "प्रतिदिनं ध्यानं करोति चेत् बन्धनात् मुक्तिं लभते" इति। कोष्ठे महाराज्ञ्याः प्रियशुकस्य पञ्जरः आसीत्। प्रतिदिनं चतुरः शुकः अपि पण्डितस्य वचनानि अवधानेन श्रुत्वा ध्यानं करोति स्म।

एकस्मिन् दिने पण्डितः यदा अन्ते "प्रतिदिनं ध्यानं करोति चेत् बन्धनात् मुक्तिं लभते" इति उक्तवान् तत्क्षणं शुकः उच्चैः उक्तवान् ," असत्यम् असत्यम् ।" शुकस्य वचनं श्रुत्वा देवशर्मा दुःखी अभवत् किन्तु महाराज्ञ्याः प्रियः शुकः आसीत् किल अतः तूष्णीं स्थितवान्। अनन्तरं पण्डितः तस्य मित्रं, विष्णुशर्मणं प्रति गतवान्। तस्मै देवशर्मा सर्वं वृत्तान्तं कथितवान् । विष्णुशर्मा उक्तवान् , "अद्य अहम् अपि भवता सह राजप्रासादम् आगमिष्यामि।" सायङ्काले देवशर्मा विष्णुशर्मणा सह प्रासादं गतवान् । महाराज्ञी आनन्देन विष्णुशर्मणे सत्कृतवती। अनन्तरं ग्रन्थपठनम् अभवत् । प्रतिदिनमिव देवशर्मा उक्तवान्, "प्रतिदिनं ध्यानं करोति चेत् बन्धनात् मुक्तिं लभते।" तत्क्षणं शुकः उच्चैः आक्रोशं कृतवान्, "असत्यम् असत्यम् ।"

तदा विष्णुशर्मा पञ्जरस्य समीपं गत्वा पृष्टवान्, "किमर्थम् एवं वदसि ?" शुकः उक्तवान् "पूर्वम् अहम् एकस्मिन् आश्रमस्य उद्याने बान्धवैः सह उषितवान्। प्रत्यग्रानि फलानि वृक्षात् त्रोटयित्वा खादितवान्। सन्तोषेण वयम् अम्बरे उड्डयनं कृतवन्तः। गुरुः शिष्यान् स्तोत्राणि पाठयति स्म। तानि श्रुत्वा अहम् अपि तथैव उक्तवान्। सर्वे मम स्तोत्रपठनं श्रुत्वा आनन्दम् अनुभवन्ति स्म। एकस्मिन् दिने एकः भक्तः - लक्ष्मीधरः आश्रमम् आगतवान्। गुरुः मां लक्ष्मीधराय दत्तवान्। सः मां नृपाय अर्पितवान्। महाराज्ञ्यै स्तोत्राणि रोचन्ते किल ? अतः राजप्रासादे सुवर्णपञ्जरे स्थापितः अहम् । महाराज्ञी मयि अतीव स्निह्यति। किन्तु अहं तु बद्धः । पण्डितस्य उपदेशं श्रुत्वा प्रतिदिनं ध्यानं करोमि। किन्तु कोऽपि परिवर्तनं नास्ति। मुक्तिः नैव प्राप्ता। अतः 'असत्यम् असत्यम्' इति वदामि।"

तदा विष्णुशर्मा शुकं किमपि नीचैः उक्तवान्। रात्रौ शुकः पञ्जरे निद्रितवान्। प्रभाते महाराज्ञी सेवकम् आहूय उक्तवती, "सूर्योदयः अभवत् किन्तु शुकः मां 'सुप्रभातम्' इति न उक्तवान् । तस्य जल्पनम् अपि अहं न श्रुतवती । शीघ्रं गच्छ, तं पश्य।" सेवकः शुकं प्रति गत्वा पुनः पुनः तम् आहूतवान् । किन्तु शुकः नेत्रे अपि न उन्मीलितवान्। "एषः तु मृतः" इति उक्त्वा सेवकः सुवर्णपञ्जरस्य द्वारम् उद्घाटितवान्। तत्क्षणं शुकः आनन्देन उड्डीय पञ्जरात् विमुक्तः अभवत्।

**उत्तराणि**

**पदबन्धः** मित्रः , भानुः , रविः , आदित्यः , खगः , मरीची , पूषा , हिरण्यगर्भः , सविता , अर्कः , भास्करः , सप्ताश्वः , तपनः , छायानाथः , दिवाकरः , सहस्रांशुः

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**संस्कृताध्ययनार्थं जालाधारित-प्रबोधवर्गस्य (online classes) पञ्जीकरणार्थं सम्पर्कः -**
**Email id: prabodhah@chitrapurmath.net.in**